श्री शिव स्तुतिः (नारायणाचार्य कृतं)

श्री शिव स्तुतिः (नारायणाचार्य कृतं)

स्फुटं स्फटिकसप्रभं स्फुटितहारकश्रीजटं
शशांकदलशेखरं कपिलफुल्लनेत्रत्रयं |
तरक्षुवरकृत्तिमद्भुजगभूषणं भूतिम-
त्कदा नु शितिकंठ ते वपुरवेक्षते वीक्षणं || 1 ||

त्रिलोचन विलोचने लसति ते ललामायिते
स्मरो नियमघस्मरो नियमिनामभूद्भस्मसात् |
स्वभक्तिलतया वशीकृतपती सतीयं सती
स्वभक्तवशतो भवानपि वशी प्रसीद प्रभो || 2 ||

महेश महितोऽसि तत्पुरुष पूरुषाग्र्यो भवा-
नघोररिपुघोर तेऽनवम वामदेवांजलिः |
नमस्सपदि जात ते त्वमिति पंचरूपोचित-
प्रपंचचयपंचवृन्मम मनस्तमस्ताडय || 3 ||

रसाघनरसानलानिलवियद्विवस्वद्विधु-
प्रयष्टृषु निविष्टमित्यज भजामि मूर्त्यष्टकं |
प्रशांतमुत भीषणं भुवनमोहनं चेत्यहो
वपूंषि गुणभूषितेहमहमात्मनोऽहं भिदे || 4 ||

विमुक्तिपरमाध्वनां तव षडध्वनामास्पदं
पदं निगमवेदिनो जगति वामदेवादयः |
कथंचिदुपशिक्षिता भगवतैव संविद्रते
वयं तु विरलांतराः कथमुमेश तन्मन्महे || 5 ||

कठोरितकुठारया ललितशूलया वाहया
रणड्डमरुणा स्फुरद्धरिणया सखट्वांगया |
चलाभिरचलाभिरप्यगणिताभिरुन्मृत्यत-
श्चतुर्दश जगंति ते जयजयेत्ययुर्विस्मयं || 6 ||

पुरा त्रिपुररंधनं विविधदैत्यविध्वंसनं
पराक्रमपरंपरा अपि परा न ते विस्मयः |
अमर्षिबलहर्षितक्षुभितवृत्तनेत्रोज्ज्वल-
ज्ज्वलज्ज्वलनहेलया शलभितं हि लोकत्रयं || 7 ||

सहस्रनयनो गुहस्सहसहस्ररश्मिर्विधुः
बृहस्पतिरुताप्पतिस्ससुरसिद्धविद्याधराः |
भवत्पदपरायणाश्श्रियमिमां ययुः प्रार्थितां
भवान् सुरतरुर्भृशं शिव शिवां शिवावल्लभां || 8 ||

तव प्रियतमादतिप्रियतमं सदैवांतरं
पयस्युपहितं घृतं स्वयमिव श्रियो वल्लभं |
विबुद्ध्य लघुबुद्धयस्स्वपरपक्षलक्ष्यायितं
पठंति हि लुठंति ते शठहृदश्शुचा शुंठिताः || 9 ||

निवासनिलयाचिता तव शिरस्ततिर्मालिका
कपालमपि ते करे त्वमशिवोऽस्यनंतर्धियां |
तथापि भवतः पदं शिवशिवेत्यदो जल्पता-
मकिंचन न किंचन वृजिनमस्ति भस्मी भवेत् || 10 ||

त्वमेव किल कामधुक्सकलकाममापूरयन्
सदा त्रिनयनो भवान्वहसि चात्रिनेत्रोद्भवं |
विषं विषधरांदधत्पिबसि तेन चानंदवा-
न्निरुद्धचरितोचिता जगदधीश ते भिक्षुता || 11 ||

नमः शिवशिवा शिवाशिव शिवार्थ कृंताशिवं
नमो हरहरा हराहर हरांतरीं मे दृशं |
नमो भवभवा भवप्रभवभूतये मे भवा-
न्नमो मृड नमो नमो नम उमेश तुभ्यं नमः || 12 ||

सतां श्रवणपद्धतिं सरतु सन्नतोक्तेत्यसौ
शिवस्य करुणांकुरात्प्रतिकृतात्मदा सोचिता |
इति प्रथितमानसो व्यथित नाम नारायणः
शिवस्तुतिमिमां शिवां लिकुचिसूरिसूनुस्सुधीः || 13 ||

इति श्रीलिकुचिसूरिसूनु नारायणाचार्यविरचिता श्री शिवस्तुतिः |